("पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं" ॥
इति पञ्चदश्यां ।)

अपटान्तरं, त्रि, (पटेन वस्त्रेण तिरस्करिण्या इति यावत् अन्तरं व्यवधानं यत्र तत्, ततो नञ्समासः ।) आसन्नं । संसक्तं । अपदान्तरं । अव्यवहितं । इत्यमरटीकायां स्वामी ॥

अपटी, स्त्री, (अल्पः पटः अल्पार्थे नञ्समासः, गौरादित्वात् ङीष् ।) वस्त्रप्रावरणं । इति हेमचन्द्रः । कानात् । इति भाषा । (यवनिका । पर्दा । इत्यादि भाषा ।)

अपटुः, त्रि, (न पटुः, नञ्समासः ।) व्याधितः । रोगी । इत्यमरः । पटुतारहितः । कार्य्याक्षमः । यथा,—
"सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्युद्धृतं" ।
इत्यमरुकविः ॥

अपतर्पणं, क्ली, (अप + तृप् + भावे ल्युट् । लङ्घनं । रोगादौ भोजनाभावः । इति हेमचन्द्रः । (अपगतं तर्पणं तृप्त्यभावो यस्य तत् । गतलोभः । तृप्तिशून्यः ।)

अपत्यं, क्ली, (न पतति वंशो यस्मात्, पत + बाहुल्यात् यत्, ततो नञ्समासः ।) पुत्त्रः । कन्या । तत्पर्य्यायः । २ सन्तानः । ३ तोकं । ४ सन्ततिः । ५ प्रसूतिः । इति जटाधरः ।
("अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते") ।
इति हितोपदेशे ।
"महीभृतः पुत्त्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिं" ।
इति कुमारसम्भवे ।)

अपत्यदा, स्त्री, (अपत्यं गर्भं तत्सेवनेन ददाति, अपत्य + दा + कर्त्तरि कः, उपपदसमासः ।) गर्भदात्रीवृक्षः । इति राजनिर्घण्टः ।

अपत्यपथः, पुं, (अपत्यस्य गर्भान्निःसारणस्य पन्था मार्गः, षष्ठीतत्पुरुषः, समासान्त अच् ।) भगं । योनिः । इति हेमचन्द्रः ।

अपत्यशत्रुः, पुं, (अपत्यस्य शत्रुः, षष्ठीतत्पुरुषः ।) कर्कटः । इति शब्दचन्द्रिका । काँकड़ा । इति भाषा ।

अपत्रपः, त्रि, (अप + त्रप् + भावे अङ् ।) त्रपारहितः । निर्लज्जः । अपगता त्रपा यस्येति बहुव्रीहौ आकारस्य ह्रस्वः ॥ ("सापत्रपः कुलगुरुर्विहितस्त्वया नः" । इति धनञ्जयविजयव्यायोगे ।)

अपत्रपा, स्त्री, (अपगता त्रपा अन्यतो लज्जा यस्याः सा, स्त्रियां टाप् लज्जाहीना । लज्जाशून्या ।) अन्यतो लज्जा । परस्मात् लज्जा । इत्यमरः । लज्जामात्रं । इति रत्नकोषः ।

अपत्रपिष्णुः, त्रि, (अप + त्रप् + शीलार्थे कर्त्तरि इष्णुच् ।) स्वभावसत्रपः । लज्जाशीलः । इत्यमरः । लाजुक इति भाषा ।

अपथं, क्ली, त्र, (न प्रशस्तः पन्थाः मार्गः, नञ्समासः । नास्ति पन्थाः प्रशस्तः मार्गो यत्र तत् । प्रशस्तवर्त्मशून्ये नगरादौ ।) अपन्थाः । मार्ग एव यो न भवति तत् । इत्यमरः । योनिः । इति शब्दरत्नावली । (विमार्गः । कुपथः । असन्मार्गः । साधुविगर्हितः पन्थाः । "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" । इति रघुवंशे ।
"न कश्चित् वर्णानामपथमपकृष्टोऽपि भजते" ।
इति शाकुन्तले ।)

अपथ्यं, त्रि, (पथ्ये वैद्योक्तभोजनादिनियमाय गीतशास्त्राधाराय वा हितं यत् ततो नञ्समासः ।) पथ्यभिन्नं । अहितं । यथा,—
"यत्पथ्यं यदपथ्यञ्च वक्ष्यते रक्तपित्तिनां" ।
इति पथ्यापथ्यग्रन्थः ।

अपदानं, क्ली, (अप + दैप् शोधने भावे ल्युट्, विद्यमानार्थे अर्श आद्यच् । अथवा अपदायति परिशुध्यत्येन कर्म्मणा, अप + दैप् + शोधने करणे ल्युट् ।) अवदानं । वृत्तं कर्म्म । वृत्तिः प्रवर्त्तनं सा प्रशस्ता विद्यते यत्र तत् । यत्र कर्म्मणि वृत्तिः सर्व्वैः प्रशस्यते तत् इत्यर्थः । इत्यमरटीकायां स्वामी ।
("गम्यत्यपदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमां" ।
इति शाकुन्तले ।)

अपदान्तरः, त्रि, (नास्ति पदान्तरं व्यवधानं यत्र सः ।) अव्यवहितः । संयुक्तः । इत्यमरः । अभिन्नपदे क्ली । (सन्निकर्षः । सान्निध्यं । सामीप्यं । नैकट्यं ।)

अपदिशं, क्ली, व्य, (दिशोर्मध्ये, अव्ययीभावः, समासान्त अच् ।) दिक्कोणः । दिशोर्मध्यं । तत्पर्य्यायः । विदिक् २ । इत्यमरः ।
("क्लीवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियां" ।
इत्यमरः ।)

अपदेशः, पुं, (अप + दिश् + घञ् । स्थानं ।) निमित्तं । शरणं । स्वरूपाच्छादनं । तत्पर्य्यायः । २ व्याजः । ३ लक्ष्यं । इत्यमरः । परानिष्टकारिभिन्नशठता । इति महाभारतटीका । (ख्यातिः । कीर्त्तिः । छलं ।
"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्" ।
इति रघुवंशे ।)

अपध्वंसजः, पुं, (अपध्वस्यतेऽनेन, अपध्वन्स + करणे घञ्, अपध्वंसो जातीनां भिन्नतासम्पादकः सङ्करस्तस्माज्जायते, अपध्वंस + जन् + ड, उपपदसमासः ।) वर्णसङ्करः । यथा,—
"शूद्रायान्तु सधर्म्माणः सर्व्वेऽपध्वंसजाः स्मृताः" ।
इति मनुः । (प्रतिलोमजातः । भिन्नवर्णसङ्कमजातः । करणादिसंकीर्णवर्णः ।)

अपध्वस्तः, त्रि, (अप + ध्वन्स + क्तः ।) परित्यक्तः । निन्दितः । चूर्णीकृतः । इति मेदिनी । (अतिदुराचारः ।) परित्यक्तः । "अपध्वस्तः परित्यक्ते निन्दिते प्यवचूर्णिते" । इति मेदिनी ।

अपनयनं, क्ली, (अप + नी + भावे ल्युट् ।) खण्डनं । दूरीकरणं । यथा,—"इति श्रीशाम्बपुराणे रोगापनयने श्रीसूर्य्यवक्त्रविनिर्गतस्तवराजः समाप्तः" इति ।
("गातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रं" ।
इति शाकुन्तले ।)

अपनोदनं, क्ली, (अप + नुद् + भावे ल्युट् ।) खण्डनं । दूरीकरणं । यथा,—"मानापनोदनविनोदनते गिरीशे" । इति श्रीहर्षः । (अपनुदति दूरीकरोति, अप + नुद् + कर्त्तरि बाहुल्यात् ल्युट् ।) खण्डकः । दूरीकारकः ।
"यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः ।
तथाघमर्षणं जप्यं सर्व्वपापापनोदनं" ।
इति मनुः । )

अपन्थाः, [थिन्] पुं, (न पन्थाः, नञ्समासः, समासान्तविधेरनित्यत्वात् अत्र अजभावः ।) अपथं । इत्यमरः ।

अपपात्रितः, त्रि, (अपकृष्टं पात्रं भोजनपात्रं यस्य सः, येन जनेन भुक्ते भोजनपात्रमस्पृश्यं भवतीति यावत् चण्डालादिः, अपपात्रः कृतः, अपपात्र + करोत्यर्थे णिच् + क्तः ।) उत्कटदोषैर्ज्ञातिभिर्भिन्नोदकीकृतः । यथा,—"अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते" । इति शुद्धितत्त्वे शङ्खापस्तम्बौ ।

अपभ्रंशः, पुं, (अप + भ्रन्स + घञ् ।) ग्राम्यभाषा । अपभाषा । तत्पर्य्यायः । अपशब्दः २ । इत्यमरः ॥ पतनं । यथा,—
"अत्यारूढ़िर्भवति महतामप्यपभ्रंशनिष्ठा" ।
इत्यभिज्ञानशकुन्तलं ॥ (अधः पतनं । ध्वंसः । अधोगतिः ।)

अपमः, पुं, (अपकृष्टतया मीयते, अप + मा + घञर्थे कः ।) क्रान्तिः । इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥

अपमानं, क्ली, (अप + मा + भावे ल्युट् ।) अनादरः । अमर्य्यादा । इति शब्दरत्नावली ॥ तत्पर्य्यायः ।
"स्यादवज्ञा परीहारः परिहारः पराभवः ।
अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया ।
अवहेला च हेला स्यादवहेलनहेलने ।
क्षेपो निकारधिक्कारौ पर्य्यायः स्यादनादरे" ॥
इति शब्दरत्नावली ॥ • ॥ तस्य अप्रकाश्यत्वं यथा,—
"अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत्" ॥
इति चाणक्यः ॥
("अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वकार्य्यमुद्धरेत् प्राज्ञः कार्य्यध्वंसे हि मूर्खता") ॥

अपमित्यकं, क्ली, (अपमित्यमानं लौकत्य गृह्यते, अप + मेङ् प्रणिमाने + क्त्वा तस्य ल्यप्, "मयतेरिदन्यतरस्यामिति आख्याने इतक्, ततः कन् ।) ऋणं । इति हलायुधः ॥

अपमृत्युः, पुं, (अपकृष्टः रोगेण विना मृत्युः मरणं